National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(60): 159-161
© 2025 NJHSR
www.sanskritarticle.com

**अर्पितापरिडा**
शोधच्छात्रा (धर्मशास्त्रविभागः),
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः

**Correspondence:**
**अर्पितापरिडा**
शोधच्छात्रा (धर्मशास्त्रविभागः),
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः

# हेमाद्रिविरचितप्रायश्चित्तचिन्तामणौ प्रायश्चित्तस्वरूपविमर्शः

**अर्पितापरिडा**

**शोधसारः**
हेमाद्रिणा चतुर्वर्गचिन्तामणौ प्रायश्चित्तखण्डस्य विन्यासः नैकप्रायश्चित्तानां परिशीलनपूर्वकं विहितं वर्तते। अत्र हेमाद्रेः उपरि पौराणिकतत्त्वानां श्रौतस्मार्त्तकर्मणां च महान् प्रभावः आसीदिति अनुमीयते। प्रायश्चित्तचिन्तामणौ प्रायश्चित्तानि पापक्षयसाधनानि कर्मक्षयसाधनभूतानीति श्लाघ्यन्ते। इमानि पतनीयानि कर्माणि विविधनरकप्रदायकानि तत्सम्बद्धजन्मकर्मविपाकप्रदायकानीति श्लाघ्यन्ते। अत्र प्रायश्चित्तचिन्तामणौ प्रायश्चित्तपदेन अविहितानामाचरणे विहितानां परित्यागे शास्त्रोक्तविधिना समन्वितद्रव्याणामव्यवहारे परित्यागे निन्दायां वा प्रायश्चित्तं तु सुतरां कर्त्तव्यमिति। अन्यथा मनुयाज्ञवल्क्यप्रभृतिभिः उक्तानां नराकादिदर्शनं जन्ममृत्युचक्रं च मानवो विन्दति। अतः यानि कर्माणि शास्त्रोक्तानि विधिसम्मतानि च तानि सुतरां सेव्यानि अन्यानि तु सुतरां त्यक्तव्यानि भवन्ति।

**पारिभाषिकशब्दाः –** प्रायश्चित्तं, पुरुषार्थाः, प्रकीर्णकं, स्तेयं, प्रत्यवायः

धर्मशास्त्रसाहित्येतिहासे हेमाद्रिणा दानश्राद्धव्यवहारप्रायश्चित्तादीनां पौराणिकसम्मतं युक्तिसापेक्षं सर्वप्राचीनतमव्यख्यानं शास्त्रीयसिद्धान्तमनुसृत्य प्रस्तुतम्। निबन्धसाहित्यजगति समेषां पूर्ववर्त्तिग्रन्थ-कारत्वेन प्रशस्तिमवाप्नोति। प्राचीनभारते वैदिकसंस्कृतिः यदा विनष्टतां प्रति गतमासीत्तदानीं धर्मशास्त्रीयविचारधारायां पौराणिकतात्पर्येण प्राचीनधर्मसूत्रस्मृतीनां च प्रयोगाधारेण चतुर्वर्गचिन्ता-मण्याख्यप्रमुखग्रन्थराशिस्तु धर्मार्थकाममोक्षाख्यपुरुषार्थानां साधनायोत्तमप्रशस्तञ्च मार्गमसावद्राक्षीत्। तदर्थमस्य वैशिष्ट्यं महत्त्वं च बहुधा निबन्धकारेष्वादृतं भवति। धर्मशास्त्रे पारिभाषिकत्वेन प्रायश्चित्तस्य व्यवहारः शास्त्रेषु शास्त्रान्तरेषु श्रौतस्मार्त्तविधिषु सुतरामुत्सृजन्ते। अतः प्रायश्चित्तपदेन तपो निश्चयात्मकं सङ्कल्पात्मकं विधानं दर्शितम्। प्रायश्चित्तेति पदेन पापक्षयसाधनभूतानि कर्माणि संसेव्य शास्त्रोक्तनिषिद्धकर्मणामनाचरणमिति श्लाघ्यते। अतः कथ्यते –

**प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते।**
**तपो निश्चय संयोगात् प्रायश्चित्तमिति स्मृतम्॥**[1]

अन्यच्च शास्त्रान्तरेषु प्रायश्चित्तस्य प्रतिपत्तिस्तु कथ्यते यत् –

तैत्तिरीयसंहितायां प्रायश्चित्तस्य पापक्षयार्थे वैदिककर्मविरामे परित्यागे च विहितं वर्तते। यथा **असावादित्यो न व्यरोचन तस्मै देवाः प्रायश्चित्तिमेच्छन्।**[2] अत्र देवकार्येषु हेलायां प्रायश्चित्तविधानं विहितं वर्तते। मनुरपि प्रायश्चित्तस्वरूपं वक्तुकामः तदाह-

**अकुर्वन्विहितं कर्म निन्दितं न समाचरन्।**
**प्रसक्तश्चैन्द्रियार्थेषु प्रायश्चित्तीयते नरः॥**[3]

अतः सर्वत्र प्रायश्चित्तस्य कर्मक्षयनिमित्तं पापादिकर्मविरामः निश्चितपूर्वकं तपः आचरणं तस्य कुत्रचित् लघुत्वेन कुत्रचित् गुरुत्वेन च व्यवहारः शास्त्रोक्तविधिना प्रदर्शितो भवति। अत्र प्रायश्चित्तचिन्तामणौ प्रायश्चित्तस्य स्वरूपं विदधातुं हेमाद्रिणा उक्तं वर्तते यत् अविहितानामाचरणे कामतो अकामतो वा तत्प्रत्यवायसाधनत्वेन प्रायश्चित्तं तु सुतरां कर्त्तव्यमिति। अत्र प्रायश्चित्तपदेनापि पूर्वं कृतकर्मणः निष्कृतिनिमित्तं क्रियमाणो व्रतविशेषो भवति।

**प्रायश्चित्तचिन्तामणौ प्रायश्चित्तस्रोतांसि**

अत्र प्रायश्चित्तचिन्तामणौ प्रायश्चित्तानां वर्णनं पूर्णतः पौराणिकविचारमनुसृत्य विहितं वर्तते। पौराणिकानुशीलनात्प्राप्यते यद् विविधेषु आख्यानेषु दानप्रतिग्रहणं श्रेष्ठजीवानां च यत् पुण्यप्रदायकद्रव्याणां वर्णनं पुराणेषु प्राप्यते तेषां द्रव्याणां पशूनां विक्रये वधे स्तेये वा प्रायश्चित्तं सुतरां विधातव्यमिति। एतदर्थं प्रायश्चित्तचिन्तामणौ तेषां समेषां प्रायश्चित्तविधानं शास्त्रपरकतया विहितम्। अत्र प्रायश्चित्तप्रसङ्गे हेमाद्रिणा अङ्गिरावशिष्ठमनुयाज्ञवल्क्यात्रिशङ्खलिखितापस्तम्बदक्षोशनाकात्यायनगार्ग्यगालवगौतम-गोभिलजातुकर्ण्यजाबालिदेवलनारदपराशरबृद्धमनुप्रभृतीनां प्राचीन-स्मृतिकाराणां नामानि उद्धृत्य तेषां प्रायश्चित्तविषयकसिद्धान्तं स्वीकृत्य प्रायश्चित्तानि प्रोक्तानि। तदतिरिच्य सर्वेषु प्रसङ्गेषु असौ हेमाद्रिस्तु पौराणिकोक्तीनां तात्पर्यपूर्वकविचारः आम्नातो वर्तते। तदर्थमत्र प्रायशः सर्वेषां पुराणानां प्रयोगविस्तरः प्राप्यते। पुराणेषु ब्रह्मब्रह्माण्डस्कन्दगरुडनारदीयपद्मकूर्ममहापुराणानां प्रशस्तिपूर्वकं तत्तत् प्रसङ्गेषु उद्धरणं प्रदाय प्रायश्चित्तप्रसङ्गे तत्रोक्तविषयाणां विधिपूर्वकं व्याख्यानं विहितम्। अत्र प्रायशः सर्वेषु पुराणेषु उक्तानां साक्षात्तत्त्वानां समन्वयात्मकविवरणं प्रस्तुतं वर्तते। अन्यच्च प्राचीनानां ग्रन्थानामत्र चन्द्रिकार्हिंसायन्त्रस्वरूपगौरीकाण्डचण्डिकाखण्डप्रभृति-ग्रन्थेषु उक्तं विषयं स्वीकृत्य प्रायश्चित्तप्रसङ्गे तस्य विमर्शः कृतो वर्तते। अत्र विविधपरकप्रायश्चित्तानि प्राप्यन्ते। तेषां प्रायश्चित्तानां ग्रन्थान्तरेषु हेमाद्रिमतानि सङ्गृह्यन्ते। यथा वेदस्यानध्याये प्रायश्चित्तं नारदोक्तमतं स्वीकृत्य प्रतिपादयति यथा –

**वेदान्तमथ वेदं वा अनध्यायेष्वधीतवान्।**
**द्विजः पापमवाप्नोति ब्रह्महत्या च विन्दति॥**[4]

धर्मशास्त्रीयसिद्धान्तास्त्वाचारव्यवहारप्रायश्चित्तेत्यनेन त्रिविधतत्त्व-मादाय नैकतत्त्वानां धर्मसम्बद्धानां विचाराणां श्राद्धदानमाचारा-दितत्त्वानां विमर्शस्तु प्राप्यते। हेमाद्रिविरचितग्रन्थः चतुर्वर्गचिन्तामणौ प्रायश्चित्तखण्डेति प्रायश्चित्तचिन्तामणिनाम्ना बहुधा व्यपदेशत्वं भजते। तत्र मनुयाज्ञवल्क्यप्रभृतिभिः स्मृतितत्त्वद्रष्टृभिस्तु प्रायश्चित्तानि महापातकानुपातकोपपातकप्रभृतिः ब्रह्महत्यासुरापानगुरुतल्पगस्तेय-पतितसंसर्गमहापातकत्वेन गोमाहिष्याजाश्ववलीवर्दप्रभृतिः उपपा-तकत्वेन च तद्वदन्येषां व्यवहारो दृश्यते। अत्रापि प्रायश्चित्तमाह हेमाद्रिः यच्च किञ्चिद् भिन्नतया स्वरूपं प्रतिपादितं वर्तते।

**प्रायश्चित्तचिन्तामणौ प्रायश्चित्तस्य भेदाः**

प्रायश्चित्तचिन्तामणौ प्रायश्चित्तस्य नैकस्वरूपं विवक्षितं वर्तते। अत्र प्रायश्चित्तप्रसङ्गे वधपरकं हरणपरकं विक्रयपरकं हिंसापरकं प्रतिग्रहपरकमुपग्रहपरकं स्तेयपरकं पशुवधपरकं च प्रायश्चित्तं दृश्यते। समेषां प्रायश्चित्तानां महापातकानुपातकोपपातकप्रकीर्णकजातिभ्रंश-करणमलिनीकरणमपात्रीकरणपर्यायत्वेनान्तर्भावो द्योतते। परन्तु अत्र स्तेयप्रायश्चित्ते समस्तस्तेयपरकं विक्रयपरकप्रायश्चित्ते समस्तविक्रय-प्रायश्चित्तानां वर्णनं विदधाति।

अत्र ब्रह्महत्यासुरापानगुरुतल्पगस्तेयपतितसंसर्गादीनि महापातकत्वेन स्वीक्रियते। गवाश्वमाहिष्यप्रभृतीनामुपपातकत्वेन प्रायश्चित्तविधानं कृच्छ्र-अतिकृच्छ्र-कृच्छ्रातिकृच्छ्र-पराक-चान्द्रायण- सान्तापन - महा-सान्ता पनादित्वेन विवक्षितं वर्तते।

**प्रायश्चित्तचिन्तामणौ प्रायश्चित्तविधानम्**

नवविधमहापातकादिपापानां तद्भूतानां नैकप्रायश्चित्तानां वर्णनं हेमाद्रिणा सम्पादितम्। अत्र प्रायश्चित्तस्य विधानमपि सर्वतोधिकं प्राप्यते। स्वयमेव हेमाद्रिणा ग्रन्थारम्भे प्रायश्चित्तानि तु कुत्रचित् होममाध्यमेन जपमाध्यमेन तपःमाध्यमेन व्रतमाध्यमेन दानमाध्यमेन च विधातव्यं भवतीति स्पष्टमुक्तम्। कानिचित्पापानि केवलमुपवा-सात्मककृच्छ्रादिव्रताचरणेन नश्यन्ति। अन्यानि कानिचित् मृत्युं यावत् ब्रह्महत्यासुरापानादीनि समाचरणीयानि भवन्ति। कानिचित् केवलं दण्डमाध्यमेन प्रशाम्यन्ति। तेषां प्रायश्चित्तानामत्र विहितविधानं कृतम्।

अत्र नैकप्रायश्चित्तानामभक्ष्यभक्षणादिषु गोमांसभक्षणं चाण्डालान्न-भक्षणादिगतानि प्रायश्चित्तानि तु सुतरां तत्र कठिनानि भवन्ति। परन्तु स्पर्शनगतानि चाण्डालस्पर्शनं मैथुनात् परमस्नानभोजनमित्यादीनां प्रायश्चित्तानां विधानं तु यथावत् त्रिरात्रमुपवासेन पराकादीनां समाचरणेन पापक्षयं मन्यते। एतन्निमित्तं शास्त्रान्तरेषु उपयुज्यमानानां प्रायश्चित्तानां महत्त्वं प्रदर्श्य तत्र तत्र उत्कर्षहेतुत्वेन आम्नातं वर्तते।

सर्वादौ सूत्रसाहित्ये गौतमापस्तम्बबौधायनप्रभृतिधर्मशास्त्र-विशारदैस्तु ब्रह्महत्यादीनि प्रायश्चित्तसन्दर्भे सूत्रात्मकाभिव्यक्तीकृतानि वर्तन्ते। तेषामपि वाक्यानि अत्र हेमाद्रिणा उद्धृतानि सन्ति। अतः हेमाद्रिविरचितप्रायश्चित्तखण्डस्य महनीयता ग्रन्थगौरवश्च जातः।

प्रायश्चित्तानि प्रतिलोमानुलोमक्रमेण च वर्णनमत्र प्रायश्चित्तग्रन्थेषु सुतरां भिन्नत्वेन अभिव्यक्तिर्दृश्यते। ब्राह्मणादीनां कृते किञ्चित्कर्म-विप्रतिपत्तिहेतुकं पुण्यकर्मविधानत्वादत्र न्यूनं प्रायश्चित्तविधानं दर्शितं क्रमशः अनुलोमे प्रायश्चित्तानि कठिनानि प्रतिलोमविधाने तु सुतरां सूक्ष्मप्रायश्चित्तानि व्रतपरकाणि उपवासपरकाणि चान्द्रायणादीनि गृह्यन्ते। अतः अत्र प्रायश्चित्तस्य सूक्ष्मातिसूक्ष्मदृष्टिः हेमाद्रिणा प्रदत्ता वर्तते।

**प्रायश्चित्तविधानशैली**

सर्वादौ हेमाद्रिणा तावत्प्रायश्चित्तानां वर्णनप्रसङ्गे पौराणिकोक्तिं प्रदर्श्य तस्य च द्रव्यविशेषस्य कर्मविशेषस्य वा शास्त्रीयविधि-पूर्वकमनाचरणत्वमवध्यत्वमभक्ष्यत्वमस्पृश्यत्वञ्च प्रतिपादितं वर्तते। अतः अस्य कर्मविपाकान्तर्भुक्तरीत्या तस्य प्रायश्चित्तमुक्तं वर्तते।

यथा सुरापानप्रायश्चित्तवर्णनप्रसङ्गे सर्वादौ विधिपूर्वकं सुरापा-नस्य निषेधत्वं विवक्षितम्। तत्र सुरायाः त्रिविधत्वं वर्णयित्वा सुरापानं चतुर्वर्ण्यानां कृते निषेधत्वेन ख्यायते। उच्यते तत्र

**गौडी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा।**
**चतुर्वर्णैरपेया स्यात् तथा स्त्रीभिश्च पण्डिताः॥**[5]

अत्र सुरायाः त्रिविधत्वं द्वादशविधत्वं शास्त्रान्तरेषु वर्णित-प्रसङ्गानुरोधेनोक्तं वर्तते। तत्र सुरां पीत्वा पापीयान् द्वादशाब्दं तु कपालध्वजवर्जितो भूत्वा ब्रह्महत्यावत् व्रतं समाचर्य्य शुद्धिमाप्नुयात् नान्यथा विवेचनं शास्त्रप्रसक्तिस्तु वर्तते।

अन्यच्च पञ्चगव्यपानपूर्वकं चान्द्रायणव्रतमाचर्य्य पुनः उपनयनं कुर्यादिति। परन्तु यदि सुरापानमारोग्यहेतुभूतो भवति तर्हि पञ्चगव्येन रजनीमेकामुपोष्य शुद्धिमाप्नुयात्। अत्र विचारणीयविषयस्तु भवति यत् सुरापानपायश्चित्तं यथा धर्मसूत्रेषु स्मृतिशास्त्रेषु प्राप्यते तथा अत्र न प्राप्यते। अत्र प्रायश्चित्तस्य स्रोतांसि भवन्ति ब्रह्माण्डपुराणं कूर्मपुराणञ्च। अत्र हेमाद्रिः प्रायश्चित्तचिन्तामणौ प्रायश्चित्तानां विवेचनं केवलं प्रायशः पौराणिकोक्त्याधारेण विन्यासः विहितो वर्तते। अस्मिन् प्रसङ्गे सूत्रग्रन्थेषु आपस्तम्बस्य मतमुद्धरति यथा **सुरापोऽग्निस्पर्शां सुरां पिबेत्। मृतः शुद्धो भव**तीति[6] प्रतिपादितम्। किञ्च श्रुत्युक्तवचनमपि तस्य निवारणार्थं प्रसङ्गक्रमेण प्रतिपादयति यत् **न सुरां पिबेत्। न कलञ्जं भक्षयेत्। न तस्यैव प्रायश्चित्तम्।**[7]

अस्यापि कठिनतरं प्रायश्चित्तं हेमाद्रिणा शास्त्रोक्तविधिना उपस्थापितं वर्तते यत् यदि सुरां पीत्वा कश्चित् गृहे वमनादीनि कृत्वा पुत्रपत्न्यादीन्पीडयति तस्य निवृत्तिस्तु प्रायश्चित्तान्तरेण उच्यते। अस्मिन् सन्दर्भे स्कन्दपुराणोक्तप्रायश्चित्तविधानं पक्षमात्रेण प्राजापत्यविधानं कृत्वा पञ्चगव्यपानपूर्वकं मासं सप्ताहं यथा पानं विहितं तद्वत् प्रायश्चित्तं कर्त्तव्यमिति। अनेन प्रकारेण प्रायश्चित्तस्य विधिपूर्वकं शास्त्रोक्तविधानेन प्रायश्चित्तानि उक्त्वा तस्य प्राशस्त्यनिन्दापुरस्सरं विचारं कृत्वा प्रायश्चित्तप्रकारं व्रतहोमजप-सङ्कल्पदानादित्वेनाचरणं कृत्वा शुद्धिमाप्नुयादिति हेमाद्रेरभिप्रायो व्यक्तीक्रियते।

एवं क्रमेणान्येषां प्रायश्चित्तानां वर्णनमपि कुत्रचित् शास्त्रोक्त-विधानेन साक्षादुक्तं वर्तते। प्रायश्चित्तचिन्तामणौ नैकप्रकार-प्रायश्चित्तानां विधानं शास्त्रस्य अर्वाचीनानां कृते प्रेरणायाः स्रोतस्त्वेन विभाति। अत्र धर्मशास्त्रीयपरिप्रेक्ष्ये सूत्रस्मृतिग्रन्थेष्वलोचितानां संस्काराणामपि यथासमये अविहिते प्रायश्चित्तं वर्णितं वर्तते। तत्रोपनयनकालगमने श्राद्धादिकालगमने अधीतवेदानां विस्मृतिगत-प्रायश्चित्तं स्वाध्यायस्यानवरततयाऽसम्पाद्यमाने प्रायश्चित्तं परित्याग-पूर्वकप्रायश्चित्तमित्यादित्वेन नैकविधप्रायश्चित्तानां वर्णनं प्राप्यते। अत्र प्रायशः सम्पूर्णं पञ्चाशताधिककर्मणां प्रायश्चित्तविधानं वर्णितं वर्तते। तत्र पुराणेषु यानि महादानानि महापुण्यप्रदानि कर्माणि विभ्लाश्यन्ते तान्यकरणे अविहिते च विक्रये च प्रायश्चित्तं विधीयते। अतः अस्य सुष्ठु समायोजनं प्रायश्चित्तचिन्तामणौ सुविहितमेव।

उपसंहारः

इत्थं प्रायश्चित्तचिन्तामणौ नैकप्रायश्चित्तानां वर्णनं सयुक्तिकं प्राशस्त्यप्राशस्त्यभेदेन तस्य कर्मविपाकत्वेनापि शास्त्रेषु श्लाघ्यन्ते। अत्रोक्तानां प्रायश्चित्तानां प्रायशः अर्वाचीनानां कृते प्रायश्चित्त-वर्णनविधिः दर्शितो वर्तते। धर्मशास्त्रे यावन्ति प्रायश्चित्तानि अनेनोक्तानि सन्ति तानि अत्र सर्वाणि ततोऽधिकं वा समुपपादितानि वर्तन्ते। तदर्थमस्य ग्रन्थस्य प्रासङ्गिकता प्राचुर्यता च शास्त्रान्तरेषु बहुधा श्लाघ्यते।

**<u>सहायकग्रन्थसूची</u>**


१. मनुस्मृतिः, मन्वर्थमुक्तावली सहिता, चौखम्बा संस्कृत सीरीज आफिस्, वाराणसी, १९७०
२. आपस्तम्बधर्मसूत्रम्, हरिदत्तसंस्कृतसीरीज
३. प्रायश्चित्तप्रकरणम्, वरेन्द्ररिसर्च सोसाइटी, राजसाहि १९२७
४. चतुर्वर्गचिन्तमणिः प्रायश्चित्तचिन्तामणि, चौखम्बा संस्कृत संस्थान, १९८५
५. धर्मशास्त्रेतिहासः, प्रो.जयकृष्णमिश्रः, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, २०१०
६. अङ्गिरसस्मृतिः, ए.एन्. क्रिष्णा अयाङ्गर, Adyar library, 1953
७. तैत्तिरीयसंहिता, वैदिकसंशोधनमण्डल, १९८३


**सङ्केताक्षरसूची**

[1] अङ्गि. स्मृ. २.४
[2] तै. सं. २.१.२.४
[3] म. स्मृ. ११.४४
[4] प्रा. चि. पृ.५२९
[5] प्रा. चि. पृ. ४३
[6] आ. ध.सू. १.९.३
[7] प्रा. चि. पृ. ४८